# shrI nRisimhamangalam

# શ્રીનૃસિંહમઙ્ગલમ્

## Document Information

Text title : nRisi.nhamaNgalam

File name : nrisimhamangalam.itx

Category : vishhnu, dashAvatAra, stotra, vishnu, mangala

Location : doc_vishhnu

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : June 25, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

## shrI nRisimhamangalam

# શ્રીનૃસિંહમઙ્ગલમ્

ઘટિકાચલ શૃઙ્ગાગ્ર વિમાનોદર વાસિને ।
નિખિલામર સેવ્યાય નરસિંહાય મઙ્ગલમ્ ॥ ૧॥

ઉદીચીરઙ્ગ-નિવસત્સુમનસ્તોમ સૂક્તિભિઃ ।
નિત્યાભિવૃદ્ધ યશસે નરસિંહાય મઙ્ગલમ્ ॥ ૨॥

સુધાવલ્લી-પરિષ્વઙ્ગ-સુરભીકૃત-વક્ષસે ।
ઘટિકાદ્રિ-નિવાસાય શ્રીનૃસિંહાય મઙ્ગલમ્ ॥ ૩॥

સર્વારિષ્ટ-વિનાશાય સર્વેષ્ટ-ફલદાયિને ।
ઘટિકાદ્રિ-નિવાસાય શ્રીનૃસિંહાય મઙ્ગલમ્ ॥ ૪॥

મહાગુરુ મનઃપદ્મ મધ્ય નિત્ય નિવાસિને ।
ભક્તોચિતાય ભવતાત્ મઙ્ગલં  શાશ્વતી સમાઃ ॥ ૫॥

શ્રીમત્યૈ વિષ્ણુચિત્તાર્યમનોનન્દન હેતવે ।
નન્દનન્દન-સુન્દર્યૈ ગોદાયૈ નિત્યમઙ્ગલમ્ ॥ ૬॥

શ્રીમન્મહાભૂતપુરે શ્રીમત્કેશવ-યજ્વનઃ ।
કાન્તિમત્યાં  પ્રસૂતાય યતિરાજાય મઙ્ગલમ્ ॥ ૭॥

પાદુકે યતિરાજસ્ય કથયન્તિ યદાખ્યયા।
તસ્ય દાશરથેઃ પાદૌ શિરસા ધારયામ્યહમ્ ॥ ૮॥

શ્રીમતે રમ્યજામાતૃ-મુનીન્દ્રાય મહાત્મને ।
શ્રીરઙ્ગવાસિને ભૂયાત્ નિત્યશ્રીઃ નિત્યમઙ્ગલમ્ ॥ ૯॥

સૌમ્યજામાતૃ-યોગીન્દ્ર ચરણામ્બુજ-ષટ્પદમ્ ।
દેવરાજગુરું  વન્દે દિવ્યજ્ઞાનપ્રદં  શુભમ્ ॥ ૧૦॥

વાધૂલ-શ્રીનિવાસાર્ય-તનયં  વિનયાધિકમ્ ।
પ્રજ્ઞાનિધિં  પ્રપદ્યેઽહં  શ્રીનિવાસમહાગુરુમ્ ॥ ૧૧॥

ચણ્ડમારુત-વેદાન્તવિજયાદિ-સ્વસૂક્તિભિઃ ।
વેદાન્ત-રક્ષકાયાસ્તુ મહાચાર્યાય મઙ્ગલમ્ ॥ ૧૨॥

ઇતિ શ્રીનૃસિંહમઙ્ગલં સમ્પૂર્ણમ્ ।

Encoded and proofread N.Balasubramanian bbalu@sify.com

---

*shrI nRisimhamangalam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*